न॰ब॰। ४अपकारशून्ये त्रि॰। ५श्वेतालतायां स्त्री।

**अविप्लुत** त्रि॰ न विप्लुतः नष्टः। अविनष्टे "अविप्लुतब्रह्मचर्य्यः सवर्णां स्त्रियमुद्वहेत्" स्मृतिः।

**अविभक्त** त्रि॰वि+भज—क्त न॰त॰। १संसृष्टे विभागरहिते २द्रव्ये ३तत्स्वामिनि च। "अविभक्तं स्थावरं यत् सर्व्वेषामेव तद्भवेदिति" "अविभक्ता विभक्ता वा सपिण्डाः स्थावरे समाः" इति च स्मृतिः। ४अभिन्ने एकभावापन्नेऽर्थे ५अव्यावृत्ते अधिष्ठानतया ६सर्व्वत्रानुस्यूते बाधाशून्यत्वेन स्वस्मिन् ७वर्त्तमाने च।

**अविभावित** त्रि॰ न विभावितः। १अलक्षिते २अचिन्तिते साक्षिप्रभृतिप्रमाणादिना ३स्वकीयत्वेनानुद्भाविते स्वरूपेण ४अज्ञापिते च।

**अविमुक्त** त्रि॰वि+मुच—क्त न॰त॰। १मुक्तभिन्ने। "न विमुक्तं शिवाभ्यां यदविमुक्तं ततो विदुः" इत्युक्तलक्षणे २काशीक्षेत्रे न॰। ३मूर्द्धचिबुकान्तरालस्थाने च। "यएषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठितः" इति जावा॰उ॰। "आमनन्ति चैनमस्मिन्" शा॰सू॰। "आमनन्ति चैनं परमेश्वरमस्मिन् मूर्द्धचिबुकान्तराले" भा॰ इमामेव श्रुतिं केचित् काशीविषयतया वर्णयन्ति वाक्यशेषे "अविमुक्तः कस्मिन् प्रतिष्ठित" इति प्रश्ने नासीवरणामध्यस्थितत्वप्रत्यभिज्ञानात्। "अपरोक्षवचना देवा इत्युक्तेः असीतिवक्तव्ये नाशीतिवर्णव्यत्यय इति तेषामाशयः। अविमुक्तक्षेत्रञ्च असीवरणयोर्मध्ये गङ्गापश्चिमतटस्थं परितः पञ्चक्रोशात्मकम्। तद्विवरणं काशीखण्डेऽनुसन्धेयम्।

**अवियोग** पु॰अभावे न॰त॰। १वियोगाभावे। विरोधे न॰त॰। २संयोगे। न॰ब॰। ३वियोगशून्ये ४संयुक्ते च। वियोगः विच्छेदः संयोगाभावः विभागश्च।

**अवियोगव्रत** न॰ अवियोगार्थं व्रतम्। मार्गशीर्षशुक्लतृतीयाकर्त्तव्ये स्त्रीणां व्रतभेदे "अवैधव्यप्रदं स्त्रीणामवियोगव्रतं त्विदम्। मार्गशीर्षे सिते पक्षे स्नातो शुक्लाम्बरप्रिया। दृष्ट्वा चन्द्रं द्वितीयायां नक्तं भुञ्जीत पायस"मित्युपक्रम्य कालिकापुराणे दर्शितम्। तद्विधिश्च हेमा॰ व्र॰ख॰ तृतीयाव्रतप्रकरणे उक्तस्तत एवावसेयः।

**अविरण** न॰ विरमणं विनाशः अभावे न॰त॰वेदे मस्य लुक्। विनाशाभावे "सद्यो बभोऽविरणाय पूर्व्वीः" ऋ॰१,१७४,८ "अविरणाय अविनाशाय" भा॰।

**अविरत** न॰विरतं विरामः भावे क्त अभावे न॰त॰। १विरामाभावे नैरन्तर्य्ये। कर्त्तरि क्त न॰त॰। २विरामशून्ये ३सन्तते द्रव्यादौ त्रि॰ क्रियाविशेषणत्वे न॰। ४कार्य्यादनिवृत्ते त्रि॰। "अविरतदयिताङ्गासङ्गसञ्चारितेन" माघः।

**अविरति** स्त्री विरामो विरतिः भावे क्तिन् अभावे न॰त॰। १निवृत्त्यभावे २विषयादौ—स्थिरचित्ततायाम् ३विरामाभावे च। न॰ब॰। ४विरामशून्ये त्रि॰।

**अविरल** त्रि॰ न विरलः न॰त॰। घने, निविड़े। विरलता च विच्छित्तिः तद्विपरीतं निविड़त्वं मध्येऽविच्छेदः।

**अविराम** पु॰अभावे न॰त॰। १विरामाभावे २विच्छेदाभावे। न॰ब॰। ३विरामशून्ये ४सन्तते च त्रि॰ "अनिमिषमविरामा रागिणां सर्व्वरात्रम्" माघः।

**अविरुद्ध** त्रि॰। न॰ त॰। १विरुद्धभिन्ने २विरोधशून्ये ३एकत्रसहावस्थायिनि ४अप्रतिबद्धे च।

**अविरोध** पु॰ विरोधः सहानवस्थानमेकदेशे समावेशो वा अभावे न॰त॰। सहानवस्थानाभावे १एकत्रावस्थाने २एकत्र समावेशे च। "श्रुतिस्मृतिविरोधे च श्रुतिरेव गरीयसी। अविरोधे तयोः कार्य्यं स्मार्त्तं वैदिकवत् सदा, स्मृतिः "सर्वेषामविरोधेन ब्रह्मकर्म्म समारभे" पुरा॰ "शेषं वाऽविरोधात्" कात्या॰ २।६।२६। "नाविरोधात्" कात्या॰५।११।८। ३विवादाभावे च।

**अविलक्षण** त्रि॰विलक्षणो भेदकधर्म्माश्रयः विरोधे न॰त॰। १तुल्यरूपे २भेदकधर्म्मशून्ये।

**अविलक्ष्य** त्रि॰नास्ति विशेषेण लक्ष्यं व्याजः उद्देश्यं शरव्यं वा यस्य। १व्याजशून्ये २उद्देश्यशून्ये ३शरव्यशून्ये ४प्रतिकारशून्ये च "अविलक्ष्यमस्त्रमपरं कतमम्" किरा॰। "अविलक्ष्यमसत्प्रतिकारम्" मल्लि॰।

**अविलम्ब** न॰ अभावे न॰त॰। १विलम्बाभावे शैघ्र्ये। न॰ब॰। २विलम्बशून्ये त्रि॰ विलम्बश्च कार्य्योत्पत्तिसाधककालप्रागभावः। तच्छून्यः अविलम्बः।

**अविलम्बित** त्रि॰ वि+लबि—क्त न॰त॰। विलम्बशून्ये १त्वरायुक्ते द्रव्यादौ। क्रियाविशेषणत्वे न॰। "अविलम्बितो द्वितीयः" कात्या॰ १०,१,८,।

**अविला** स्त्री अव—इलच्। मेष्याम् १नास्ति विलं यत्र। २गर्त्तशून्ये त्रि॰। [न॰ब॰। ३तच्छून्ये त्रि॰।

**अविलास** पु॰ अभावे न॰त॰। १विलासाभावे २अप्रकाशे

**अविवक्षित** त्रि॰ न विवक्षितः। १वक्तुमनिष्टे २तात्पर्य्याविषयीभूते "बहुत्वमविवक्षितमिति रघु॰।

**अविवर** त्रि॰ नास्ति विवरं छिद्रं यत्र। नीरन्ध्रे, घने।

**अविवाच्य** न॰ नास्ति विशेषेण वाच्यो मन्त्रादिः यत्र।